
# मीमांसाकौस्तुभः

राष्ट्रिय संस्कृत संस्थान
नई दिल्ली



**Publisher** : Rashtriya Sanskrit Sansthan, New Delhi
**Printer** : Chowkhamba Sanskrit Series Office, Varanasi

This book has been published with the financial aids of Rashtriya Sanskrit Sansthan, New Delhi under the reprinting scheme of the Sansthan

Publisher
**Rashtriya Sanskrit Sansthan**
Deemed University
56-57, Institutional Area, Janakpuri
New Dehli-58

*Printer*
**CHOWKHAMBA SANSKRIT SERIES OFFICE**
Publishers and Oriental and Foreign Book-sellers
K. 37/99, Gopal Mandir Lane
At the North Gate of Gopal Mandir
Near Golghar ( Maidagin )
Post Box No. 1008, Varanasi- 221001 ( India )
Phone { Office : (0542) 2333458
Resi. : (0542) 2334032, 2335020
Fax : 0542-2333458
e-mail : cssoffice@sify.com
web-site : www.chowkhambasanskritseries.com

# पुरोवाक्

विदन्त्येव विपश्चितो यत्संस्कृतभाषा भारतीयां साहित्यपरम्परां तत्संवलितां प्रज्ञाञ्च सहस्रशो वर्षेभ्यः प्रकाशयन्ती संवर्धयन्ती च राजते। इयं हि भाषा परम्परा प्रज्ञा च प्रतियुगं नवनवमात्मानं प्रस्फुरति समाविष्करोति च। तत्र च वेदाः, शास्त्रीयं वाङ्मयम्, इतिहासः, पुराणानि, काव्यानीत्यनेकरचनाः विकासंगताः। ताश्च परम्परया संरक्षिताश्च। तत्ता आधुनिकशैल्या च संरक्षितुकामं राष्ट्रियसंस्कृतसंस्थानं मुद्रणं सान्द्रमुद्रिकानिर्माणं, सङ्गणकद्वारा संरक्षणमिति विविधप्रयासैः प्रयतमानं वर्तते। तत्राद्यं स्थानं भजते अध्ययनमध्यापनमिति स्वीयपरिसरेषु यत्र मौखिकपद्धत्या इमाः परम्पराः संरक्ष्यन्ते।

सर्वसाधनसम्पन्नेऽस्मिन्नाधुनिकलोकेऽपि ग्रन्थानां महत्ता न किञ्चिन्न्यूना दृश्यते। तत्र च कारणं सर्वजनसुलभतैव। अतएव संस्थानमपि ग्रन्थप्रकाशनकर्मणि आत्मानं सततं व्यापारयति। न केवलं स्वयं ग्रन्थान् प्रकाशयति अपि तु ग्रन्थप्रकाशनार्थमनुदानमपि दत्त्वा प्रकाशकान् लेखकांश्च प्रोत्साहयति। लोकप्रियग्रन्थमाला, शास्त्रीयग्रन्थमाला, अप्रकाशितग्रन्थप्रकाशनमाला इति विविधग्रन्थमालाः संस्थानेन प्रकाश्यन्ते। ते च ग्रन्थाः भृशं विद्वल्लोकेन समादृता आद्रियन्ते च। एतदतिरिच्य संस्कृतभाषाध्ययनार्थमपि स्वाध्यायशैल्या विरचिता दीक्षाग्रन्था अपि संस्थानेन प्रकाशिता लोके चिरं प्रतिष्ठायां प्राप्नुवन् ये च ग्रन्थाः अनौपचारिकसंस्कृतशिक्षणकेन्द्रेषु आभारतं प्रधानतया पाठ्यन्ते।

एवं प्रकाशितग्रन्थाः अचिरादेव विद्वत्समाजस्य स्वाध्यायरतानां जिज्ञासूनां छात्राणां च कृते सुलभ्या भवन्तीति संस्थानप्रकाशनानां वैशिष्ट्यं प्रयोजनञ्च चरितार्थतां याति। तादृशग्रन्थानां पुनः प्रकाशनायापि संस्थानं कटिबद्धं वर्तते। तत्र क्रमे एष ग्रन्थो विद्वल्लोकेन भृशं समादृतः **मीमांसाकौस्तुभः** इति नामकः मीमांसा शास्त्रीयः संस्थानस्य पुनर्मुद्रणयोजनान्तर्गततया प्राकाश्यन्नीयते। एषोऽपि ग्रन्थः सर्वैः यथापूर्वं समाद्रियेत इति विश्वसिमि। अस्मिन् पुनर्मुद्रणकर्मणि साहाय्यमाचरितवद्भ्यः सर्वेभ्यः संस्थानस्य अधिकारिभ्यः सम्यङ् मुद्रणार्थं च मुद्रकाय साधुवादान् वितरामि।

**–राधावल्लभः त्रिपाठी**

# MIMAMSA KAUSTUBHA

*(An exhaustive commentary of Jaiminisutra)*

*By*

*KHANDADEVA*

Edited by

**M. M. Pt. A. CHINNASWAMI SASTRI**

RASHTRIYA SANSKRIT SANSTHAN
Deemed University
56-57, Institutional Area, Janakpuri
New Dehli-110058

| अधिकरणनामानि | पृ० |
|---|---|
| १० निर्मन्थ्याधिकरणम् | २४१ |
| ११ वैश्वदेवाधिकरणम् | २४४ |
| १२ वैश्वानराधिकरणम् | २५४ |
| १३ तत्सिध्यधिकरणम् | २६८ |
| १४ जात्यधिकरणम् | २७९ |
| १५ सारूप्याधिकरणम् | २८१ |
| १६ प्रशंसाधिकरणम् | २८३ |
| १७ भूमाधिकरणम् | २८५ |
| १८ लिङ्गसमवायाधिकरणम् | २९२ |
| १९ वाक्यशेषाधिकरणम् | २९३ |
| २० सामर्थ्याधिकरणम् | २९८ |

द्वितीयाध्यायस्य प्रथमः पादः

| | |
|---|---|
| १ प्रतिपदाधिकरणम् | १ |
| २ भावार्थाधिकरणम् | ५ |
| ३ अपूर्वाधिकरणम् | ४५ |
| ४ तानिद्वैधाधिकरणम् | ६३ |
| ५ सम्मार्गाधिकरणम् | ७१ |
| ६ स्तुतशस्त्राधिकरणम् | ८६ |
| ७ विधिमन्त्राधिकरणम् | १०१ |
| ८ मन्त्रलक्षणाधिकरणम् | १०७ |
| ९ ब्राह्मणलक्षणाधिकरणम् | १०९ |
| १० ऊहाद्यमन्त्रताधिकरणम् | ११० |
| ११ ऋग्लक्षणाधिकरणम् | ११२ |
| १२ सामलक्षणाधिकरणम् | ११३ |
| १३ यजुर्लक्षणाधिकरणम् | ११४ |
| १४ निगदाधिकरणम् | ११५ |
| १५ एकवाक्यताधिकरणम् | १२० |
| १६ वाक्यभेदाधिकरणम् | १२३ |
| १७ अनुषङ्गाधिकरणम् | १२९ |
| १८ व्यवायाधिकरणम् | १३५ |

धीनां शेषाः, न तु स्वतन्त्रफलविधयः, पूर्णाहुत्यादीनां तदुत्तरीत्यैव फलानपेक्षत्वात् । सर्वकामावाप्तिवचनं च सर्वकामजनककर्माधिकारसम्पादनाद्गौणम् । पूर्णाहुत्यादौ कृत एव हि तत्तदुत्तरकर्माधिकारः । यद्यपि चैवं सर्वशब्दानुरोधात्सुरकन्यागमनादिजनककर्माधिकारः कथमप्यसम्भवी, तथापि सर्वमोदनं भुञ्जत इतिवत्सर्वत्वमाधिकारिकं सम्भवमात्रापेक्षमित्यर्थः ॥ १६ ॥

## फलस्य कर्मनिष्पत्तेस्तेषां लोकवत्परिमाणतः फलविशेषस्स्यात ॥ १–२–१७ ॥

यद्यपि च पूर्णाहुत्यादेस्सर्वफलसाधनत्वं स्यात्, तथापि नान्यानर्थक्यम्, कर्मतारतम्येन फलतारतम्योपपत्तेः । अवश्यं चान्यत्राप्यग्निहोत्रदर्शपूर्णमासादिष्वेकफलकेषु कर्मस्वल्पेनैव महतः फलस्याप्तौ महति कर्मणि समानपरिमाणत्वेऽपि निस्सारशमीमयत्वादिनैव तदाप्तौ समाराहिरण्मयस्रुक्करणे प्रवृत्त्यनुपपत्तेर्विधिवैयर्थ्यप्रसङ्गात्फलतारतम्यं कल्प्यम् । दृष्टं च लोकेऽपि वृष्ट्यादितारतम्येन फलतारतम्यम् । "ब्रह्महत्याश्वमेधाभ्यां न परं पुण्यपापयोः" इति स्मरणं, "यदग्निहोत्रं जुहोत्यथ गृहमेधिनमाप्नोत्येकया रात्र्या, अथ दशसंवत्सरानग्निहोत्रं जुहोत्यथ दर्शपूर्णमासयाजिन आप्नोति", इत्याद्यर्थवादाश्चामुमेवार्थं गमयन्ति ॥ १७ ॥

## अन्त्ययोर्यथोक्तम् ॥ १-३-१८ ॥

शुद्धपृथिवीचयननिषेधो "हिरण्यं निधाय चेतव्य" मित्यस्य विधेर्नहिनिन्दान्यायेन स्तुत्यर्थो नित्यानुवादो वाङ्मनसयोरिव । तदुपपादकत्वेन चेतरावपि प्रतिषेधौ नित्यानुवादौ । यथा